This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ श्रीगणेशाय नमः ॥ बलाद्याभिनिखिलार्चितास्त्रिदशसंदोहाः सदाभीष्टदाः स्वाज्ञानप्रश
मायथत्र मनसो वृत्तीः समस्तार द्धुः ॥ श्रीविष्णोश्चरणाम्बुजं भवभयध्वंसैकबीजं परं हृदये विनि
धाय तन्निरूपमं तर्कामृतं तन्यते ॥ १ ॥ अथ श्रुतिः श्रूयते । आत्मा वारे द्रष्टव्यः श्रोतव्यो मंतव्यो
निदिध्यासितव्य इति । अस्यार्थः मुमुक्षुणा आत्मा द्रष्टव्यः । मुमुक्षोरात्मदर्शनमिष्टसाध
नमिति यावत् । आत्मदर्शनोपायः क इत्याह श्रोतव्य इत्यादि । तेनार्थक्रमेण शब्दक्रमस्य
लोभवति । अग्निहोत्रं जुहोति यवागूं पचतीतीदिशोवत् ॥ तथा च श्रवणमनननिदिध्यासना
नि तत्त्वज्ञानजनकानीति फलं भवति ॥ अत्र श्रुतितः कृतात्मश्रवणस्य मनने ऽधिकारः मन
नं चेतरभेदानुमानं तच्च भेदप्रतियोगी तरज्ञानसाध्यं तथा चेतर एव के इतरथं पदार्थनि
रूपणं संक्षेपतः । सामान्यतः पदार्थो द्विविधः । भावो ऽभावश्च । भावः षड्विधः द्रव्यगुणक
र्मसामान्यविशेषसमवायभेदात् तत्र द्रव्यत्वगुणत्वकर्मत्वानि जातयः सामान्यत्वादीनु

KKSU LIBRARY RAMTEK 441 106 M 1459 Dist. Nagpur

Acc. NO. ~~1471~~ M1459.
Title – तर्कामृत. संपूर्ण
Author – जगदीश.
Date – शके 1699.
Sub – न्याय.
folio – 13
Xerox – 24

Checked 2012

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पाथयः॥ द्रव्याणि नव। पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनांसि। आकाशत्वकालत्व
दिक्त्वान्युपाधयः। अन्यानि जातयः॥ तत्र रूपरसगंधस्पर्शसंख्यापरिमाणपृथक्त्वसंयोग
विभागपरत्वापरत्वगुरुत्वद्रवत्वसंस्काराश्चतुर्दशगुणाः पृथिव्यां। तत्रैव गंधं विहाय स्ने
हं विनियोज्य चतुर्दशगुणा जलस्य। रूपस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वा
परत्वद्रवत्वसंस्काराः॥ एकादशगुणास्तेजसः। स्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागप
रत्वापरत्वसंस्काराः नवगुणाः वायोः। शब्दसंख्यापरिमाणपृथक्त्वसंयोगविभागा [redacted]
षड्गुणा आकाशस्य। संख्यापरिमाणपृथक्त्वसंयोगविभागाः पंचगुणाः कालदिशोः। संख्या
परिमाणपृथक्त्वसंयोगविभागपरत्वा बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मसंस्काराश्च
तुर्दशगुणा आत्मनः। संख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वसंस्काराः अष्टौगु
णाः मनसः। [redacted] ज्ञानेच्छाकृतिसंख्यादिपंचकं अष्टौ गुणा ईश्वरस्य। तथा चोक्तं। वायोर्नवैका

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तर्का॰ २

दश तेजसो गुणा जलस्योत प्राणभृतां चतुर्दश॥ दिक्कालयोः पंचषडेव चांबरे महेश्वरेष्टौ मनसस्त
थैव च॥ तत्र पृथिवीजलतेजोवायवो द्विविधाः परमाणवः सावयवाश्च। आकाशकालात्मादिशो विभुरू
पाः। मनः परमाणुरूपं। तत्र सावयवा अनित्याः इतराणि नित्यानि॥ सावयवा अपि त्रिविधाः। शरीरेंद्रि
यविषयभेदात्॥ मानुषाणां शरीरं पार्थिवं॥ जलीयं शरीरं वरुणलोके प्रसिद्धं॥ तैजसं शरीरमादित्य
लोके॥ वायवीयं शरीरं वायुलोके॥ घ्राणेंद्रियं पार्थिवं॥ रसनेंद्रियं पार्थिवं॥ चक्षुरिंद्रियं तैजसं।
त्वगिंद्रियं वायवीयं॥ श्रोत्रेंद्रियं कर्णशष्कुल्यवच्छिन्नो नभःप्रदेशः। एतानि पंच बाह्येंद्रियाणि।
मनोंतरिंद्रियं। तेन षडिंद्रियाणि॥ विषयाश्च शय्यादिरूपेण प्रसिद्धाः॥ आत्मा द्विविधः॥ जीवा
त्मा परमात्मा चेति। तत्र जीवात्मानः प्रतिशरीरं भिन्नाः ध्रुवं मोक्षयोग्याः। परमात्मा ईश्वरः। अथाप्र
त्यक्ष प्रत्यक्षद्रव्याणि॥ परमाणुद्व्यणुके अप्रत्यक्षे। उद्भूतरूपवत्त्वं यत्र तानि पृथिवीजलतेजां
सि प्रत्यक्षाणि। जीवात्मा प्रत्यक्षः। वाय्वाकाशकालदिङ्मनांसि अप्रत्यक्षाणि॥ द बहिर्द्रव्यप्र
त्यक्षं प्रति महत्त्वे सति उद्भूतरूपवत्त्वं प्रयोजकं॥ छ

॥[redacted]

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

जकं ॥ अथ द्रव्योत्पत्तिप्रक्रिया ॥ तत्रोत्पत्तिः कारणवतां ॥ अनन्यथासिद्धनियतपूर्ववृ
त्तिकारणं ॥ तत्वं कारणत्वं ॥ त्रिविधानि कारणानि ॥ समवायिकारणासमवायिकार
णनिमित्तकारणानि ॥ यत्समवेतं कार्यमुत्पद्यते तत्समवायिकारणं ॥ यथा परमाणुः
द्व्यणुकस्य ॥ समवायिकारणे संबद्धं कारणं असमवायिकारणं ॥ यथा परमाणुद्वयसं
योगो द्व्यणुकस्य ॥ कपालरूपं घटरूपस्य ॥ एतदुभयभिन्नं कारणं निमित्तकारणं ॥ यथा
द्व्यणुके ईश्वरः ॥ घटे दंडः ॥ एतत्कारणत्रयं भावकार्यमात्रस्य ॥ तत्र समवायिकारणं सर्वत्र
द्रव्यमेव ॥ असमवायिकारणं द्रव्ये गुणः गुणे गुणः कर्म च ॥ कार्यमात्रं प्रति साधारणकार
णानि ॥ ईश्वरस्तज्ज्ञानेच्छाकृतयः प्रागभावकालदिगदृष्टानि ॥ तत्र परमाणुद्वयसंयोगात्
द्व्यणुकमुत्पद्यते ॥ संयुक्तद्व्यणुकत्रयात् त्रसरेणुः ॥ एवं चतुरणुकादिकपालांतं ॥ कपालद्व
यसंयोगेन घटो जायते ॥ घटस्त्वंत्यावयवी ॥ अथ द्रव्ये प्रमाणं कथ्यते ॥ प्रत्यक्षद्रव्ये प्रत्यक्षमे
व प्रमाणं ॥ अतींद्रियेऽनुमानं ॥ तत्पक्षसाध्यहेतुदृष्टांतज्ञानसाध्यं ॥ विशेषो वक्ष्यते ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

परमाणुद्व्यणुकानुमानं यथा॥ त्रसरेणुः॥ सावयवद्रव्यारब्धः॥ बहिरिंद्रियवेद्यद्रव्यत्वात्॥
बहिरिंद्रियवेद्यद्रव्यं यत्तत्सावयवद्रव्यारब्धं॥ यथा घटः॥ अत्र त्रसरेणुः पक्षः॥ सावयवद्रव्या
रब्धत्वं साध्यं॥ बहिरिंद्रियवेद्यद्रव्यत्वादिति हेतुः॥ घटो दृष्टांतः॥ अनेन द्व्यणुकं परमाणुश्च सि
ध्यति॥ आकाशवायू शब्देन स्पर्शेन चानुमीयेते॥ शब्दो द्रव्याश्रितो गुणत्वात्॥ यथा घटरूपं॥ अ
नेन द्रव्यांतरबाधात् शब्दाश्रयत्वेन आकाशः सिध्यति॥ पृथिव्यादित्रयारतिरयं स्पर्शः द्रव्याश्रितो
गुणत्वात्॥ इत्यनुमानेन द्रव्यांतरबाधात् स्पर्शाश्रयत्वेन वायुः सिध्यति॥ काले प्रमाणं यथा॥ परत्वा
परत्वे द्विविधे॥ कालिके दैशिके च॥ परत्वोत्पत्तिश्च बहुतररविक्रियाविशिष्टशरीरज्ञानात्॥ अ
परत्वोत्पत्तिश्च स्वल्पतररविक्रियाविशिष्टशरीरज्ञानात्॥ तत्परत्वं ज्येष्ठत्वं॥ अपरत्वं कनिष्ठत्वं॥
तदनुमानं यथा॥ परत्वजनकं बहुतररविक्रियाविशिष्टज्ञानमिदं॥ परंपरासंबंधघटकसापे
क्षं॥ साक्षात्संबंधाभावेपि विशिष्टज्ञानत्वात्॥ लोहितस्पटिकरतिमसयवत्॥ परंपरासंब
धश्च रविक्रियायाः स्वसमवायिसंयुक्तसंयोगः॥ तेन संबंधघटकतया एकः कालः सिध्यति॥
ननु कालस्य भूतभविष्यद्वर्तमानभेदेन बहुत्वात् कुत एकत्वमिति चेन्न॥ उपाधिभेदेन भे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दमत्वयात्॥ कालोपाधयः रविक्रियादिरूपाभिन्ना एव॥ देशिकपरत्वापरत्वाभ्यां दिशांसिद्धिः।
नेचदूरत्वसमीपत्वे॥ अवधिसापेक्षबहुतरसंयोगविशिष्टज्ञानमिदं परत्वजनकं॥ परंपरा
संबंध घटकसापेक्षमित्यादि पूर्ववत्॥ तेनतयादिशः सिद्धिः॥ नत्वाकाशमेव संबंध घटकमात्मा
मितिवाच्यं॥ तस्यशब्दाश्रयत्वेनैव धर्मिग्राहकप्रमाणसिद्धत्वात्॥ नरविक्रियाद्युपनायक
त्वसंभवः॥ अहं सुखीत्यादिप्रत्यक्ष[illegible]मात्मनि प्रमाणं॥ ईश्वरेअनुमानं॥ यथा क्षितिः सकर्तृका
कार्यत्वात्॥ घटवत्॥ तेनईश्वरस्यतद्दृष्टि नित्यज्ञानेच्छाकृतीनां तत्सार्वज्ञस्य चसि
धिः॥ मनसिप्रमाणं तद्यथा॥ सुखादिप्रत्यक्षमिंद्रियजन्यं जन्यप्रत्यक्षत्वात्॥ घट
प्रत्यक्षवत्॥ तथा चरेंद्रियांतरबाधेमनसः सिद्धिः॥ अथ द्रव्यनाशप्रक्रिया॥ द्रव्य
नाशो द्विविधः॥ क्वचित्समवायिकारणनाशादसमवायिकारणनाशाच्च॥ तत्राद्यो
यथा॥ परमाणुद्वयसंयोगनाशात् द्व्यणुकनाशः॥ द्वितीयो यथा॥ कपालनाशात्
घटनाशः॥ घटनाशो भयतः संभवति॥ आकाशकालदिगात्मपरमाणवोऽवृत्तयः॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त०म० ४

समवायश्चावृत्तिरिति॥ [redacted]॥ पृथिव्यादिपंचानांभूतत्वं॥ पृ
थिवीजलतेजोवायुमनसांक्रियावत्त्वमूर्तत्वे॥ पृथिवीजलतेजोवायवो द्रव्यसमवायि
कारणानि॥ कालस्यकालिकसंबंधेनसर्वाधिकरणत्वं॥ अथ गुणाः कथ्यंते॥ रूप
रसगंधस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वशब्दबुद्धिसुख
दुःखेच्छाद्वेषप्रयत्नगुरुत्वद्रवत्वस्नेहसंस्कारधर्माधर्माश्चतुर्विंशतिगुणाः॥ अत्ररू
पत्वादीनि सर्वाण्येवजातयः॥ रूपंपृथिव्यादित्रयवृत्ति॥ तच्च शुक्लनीलपीतरक्तह
रितकपिशचित्रभेदात्सप्तविधं॥ पृथिवीवृत्ति॥ स्वच्छं शुक्लरूपंजलवृत्ति॥ शुक्लभास्वरं
तेजोवृत्ति॥ रसः पृथिवीजलवृत्तिः॥ तत्रमधुरलवणकटुकषायतिक्ताम्लाः षड्विधार
साःपृथिव्यां॥ जलेमधुरएवरसः॥ गंधोद्विविधः॥ सुरभिरसुरभिश्च॥ पृथिवीमात्रवृ
त्तिः॥ स्पर्शश्च पृथिव्यादिचतुष्टयवृत्तिः॥ सत्रिविधः॥ अनुष्णाशीतः। शीतः। उष्णश्च॥
अनुष्णाशीतस्पर्शोवायुपृथिव्योः॥ जलेशीतः। तेजस्युष्णः॥ संख्यापरिमाणपृथ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कृत्य संयोग विभागाः नव द्रव्य वृत्तयः॥ परत्वापरत्वे पृथिविजल तेजो वायु मनो वृत्तिनी॥ बुद्धि
सुख दुःखेच्छा द्वेष प्रयत्न भावना धर्माधर्माः आत्मवृत्तयः॥ गुरुत्वं पृथिवीजल वृत्ति॥ द्रवत्वं पृथि
वी जल तेजो वृत्ति॥ तद्द्विविधं॥ नैमित्तिकं सांसिद्धिकं च॥ आद्यं पृथिवीतेजसोः॥ द्वितीयं जले॥
स्नेहो जलमात्र वृत्तिः॥ संस्कारः पृथिवी जल तेजो वायु आत्म मनो वृत्तिः॥ स च त्रिविधः॥ वेगो
भावना स्थिति स्थापकश्च॥ तत्र वेगः पृथिव्यादि चतुष्टय मनो वृत्तिः॥ द्वितीय आत्म वृत्तिः॥
तृतीयः पृथिव्यादि चतुष्टय वृत्तिः॥ शब्दो द्विविधः॥ वर्णात्मको ध्वन्यात्मकश्च॥ आकाश मात्र
वृत्तिः॥ रूप रस गंध स्पर्श स्नेह सांसिद्धिक द्रवत्व शब्द बुद्धि सुख दुःखेच्छा द्वेष प्रयत्न धर्माधर्म
भावना विशेषगुणाः॥ तथा चोक्तं॥ रूपं गंधो रस स्पर्शः स्नेहः सांसिद्धिको द्रवः॥ बुध्यादि
भावनांतश्च शब्दो वैशेषिका गुणाः॥ संख्या परिमाण पृथक्त्व संयोग विभाग परत्वापरत्व गु
रुत्व नैमित्तिक द्रवत्व वेग स्थिति स्थापकाः सामान्यगुणाः॥ अथ नित्यगुणाः॥ जल तेज वायु प
रमाणूनां विशेषगुणाः॥ परमाणु वृत्ति गुरुत्वं स्थिति स्थापकश्च॥ विभूनां परमाणूनां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१

त० सं० र एकत्व परिमाण पृथक्त्वानि नित्यानि॥ ईश्वरेच्छाज्ञानप्रयत्नाश्च नित्यगुणाः॥ अथाप्रत्यक्षगुणाः।
गुरुत्वधर्माधर्मभावनास्थितिस्थापकाः॥ परमाणुद्व्यणुकवृत्तिगुणाः॥ अतींद्रियवृत्तिसामान्य
गुणाः त्रसरेणो रूपं विहाय अन्ये विशेषगुणा अतींद्रियाः॥ रूपरसगंधस्पर्शस्नेहप्रत्यक्षे मह
द्वृत्तित्वे सत्युद्भूतत्वं प्रयोजकं॥ सामान्यगुणप्रत्यक्षे आश्रयप्रत्यक्षं॥ बुद्धिप्रत्यक्षे स्ववृत्तिविशि
ष्टज्ञानत्वं॥ सुखादिप्रत्यक्षे स्ववृत्तिसुखत्वादिकमेव॥ अंसाधयन्ना बुद्धौ विहायन्ना द्वप्रत्यक्षः॥ अ
थ गुणोत्पत्तिप्रक्रिया॥ अवयववृत्तिविशेषगुणाः अवयविनि स्वसमानजातीयगुणानारभंते॥।
पृथिवीविशेषगुणाः पाकजाः॥ ते द्विविधाः॥ पाकप्रयोज्याः पाकजन्याश्च॥ कारणगुणक्रम प्र
जन्याः पाकप्रयोज्याः॥ अग्निसंयोगजन्याः द्वितीयाः॥ श्यामघटस्य अग्निसंयोगे नश्याम
रूपनाशानंतरं घटे रक्तं रूपं उत्पद्यत इति नैयायिकमतं॥ अग्निसंयोगेन परमाणौ पाके सति
परमाणौ रक्तं रूपमुत्पद्यते॥ पुनर्घटोत्पत्तौ सत्यां कारणगुणप्रक्रमेण घटे रक्तं रूपमुत्पद्यते
इति वैशेषिकमतं॥ कपालं नीलमेकं एकं च पीतं यदि तदा घटे चित्ररूपमुत्पद्यते॥ रसादा
वेवं सति अवयविनि रसो न जायते चित्ररसास्वीकारात्॥ गुरुत्वस्थितिस्थापकयोश्च

५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कारणगुणप्रक्रमजन्यता॥ द्वित्वादयः अपेक्षाबुद्धिजन्याः॥ परिमाणं चतुर्विधं॥ अणुमहद्दी
ह र्घह्रस्वं च॥ सर्वं कारणगुणप्रक्रमजन्यं॥ यथा घटपरिमाणं॥ स्वावयवबहुत्वजन्यं॥ यथा त्र
सरेणूनां॥ अवयवानां शिथिलसंयोगः अवयवोपि तज्जनकः॥ यथा तूलपरिमाणं॥ पृथ
क्त्वं कारणगुणप्रक्रमजन्यं॥ ननु तत्र किं प्रमाणं॥ घटान्न पटः पृथगिति प्रत्यक्षं॥ न स्यादन्
न्योन्याभावविषयकत्वादिति चेन्न॥ अन्योन्याभावप्रतीतौ अनुयोगिप्रतियोगिनोः स
मानविभक्तिकत्वनियमात्॥ यथा घटः पटो न स[illegible]न्योन्याभावस्य पृथक्त्वरूपत्वे घटान्न
पटो न स्यादिप्रयोगापत्तेः॥ न चैवं घटादन्यः पट इत्यत्र कथमन्योन्याभावप्रतीतिरिति वाच्यं॥ अ व
न्यत्वस्यापि पृथक्त्वरूपत्वात्॥ संयोगस्त्रिविधः॥ अन्यतरकर्मजः उभयकर्मजः संयोग
श्च॥ आद्यो यथा॥ मनःकर्मणा आत्ममनसोः संयोगः॥ द्वितीयो यथा॥ मेषयोः कर्मणा
तयोः संयोगः॥ तृतीयो यथा॥ कारणाकारणसंयोगात् कार्याकार्यसंयोगः॥ हस्ततरुसं
जर योगात् कायतरुसंयोगः॥ विभागस्त्रिविधः॥ अन्यतरकर्मजः॥ उभयकर्मजः॥ विभागश्च॥ ज
आद्यो यथा॥ मनःकर्मणा आत्ममनसोर्विभागः॥ द्वितीयो यथा॥ मेषयोः कर्मणा तयोर्विभागः॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न० मु० विभागजविभागो द्विविधः॥ कारणमात्रविभागजः॥ कारणाकारणविभागजश्च॥ अघो
६ यथा॥ कपालकर्मणा कपालद्वयविभागः॥ ततः कपालद्वयसंयोगनाशः॥ ततः घटनाशः॥ ततः
कपालस्य आकाशादिदेशाद्विभागो विभागजः॥ न च विभागः स्वोत्पत्त्यनंतरमेव विभा
गजविभागं जनयतीति वाच्यं॥ द्रव्यनाशसहकृतस्यैव तस्य तज्जनकत्वात्॥ द्रव्यस्यात्र
निबंधकत्वेन सति द्रव्ये तदसंभवात्॥ न च कर्मैव एकदा कपालद्वयविभागमाकाशकपालवि
भागं च जनयत्विति वाच्यं॥ सद्द्रव्यानारंभकसंयोगनिरोधिनं विभागमारभते॥
न तद्द्रव्यारंभकसंयोगविरोधिनं॥ यथा विकसत्कुड्मलदलकर्मेति भंगापत्तेः॥ न च स
संयोगेष्वेव मस्तु न त्वाविरोधात्॥ द्वितीयस्तु कारणाकारणविभागात् कार्याकार्य
विभागः॥ हस्ततरुविभागात् कायतरुविभागः॥ परत्वापरत्वोत्पत्तिः कालप्रमाणे
उक्ता॥ बुद्धिर्ज्ञानं॥ तद्द्विविधं॥ स्मरणमनुभवश्च॥ स्मरणं द्विविधं॥ यथार्थमय
थार्थं च॥ तद्वति तत्प्रकारकत्वं यथार्थत्वं॥ तदभाववति तत्प्रकारकत्वमयथार्थत्वं॥

५+ व्याप्तेः। अन्यथा विकसत्कुड्मलदल +५

६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पूर्वानुभवः संस्कारद्वारा स्मरणं जनयति॥ तत्र पूर्वानुभवस्य यथार्थत्वायथार्थत्वाभ्यां स्मरणमु
भयरूपं भवति॥ अनुभवो द्विविधः॥ प्रमा अयथार्थश्च॥ तत्र प्रमा चतुर्विधा॥ सा वक्ष्यते॥ अयथा
र्थज्ञानं त्रिविधं॥ संशयविपर्ययस्वप्नोनध्यवसायश्च॥ संशयो यथा॥ समानधर्मवद्धर्मि
ज्ञानविशेषादर्शनद्विकोटिस्मरणैः॥ अयं स्थाणुर्वा पुरुषो वेति ज्ञानं जन्यते॥ स एव संशयः॥ वि
पर्ययस्तु समानधर्मवद्धर्मिज्ञानविशेषादर्शनैककोटिस्मरणैः शुक्ताविदं रजतमिति ज्ञानं ज
न्यते॥ तत्र गुरुमते इदमित्यनुभवात्मकं ज्ञानं रजतमिति स्मरणात्मकं तेन ग्रहणस्मरणात्मकं
ज्ञानद्वयं॥ न तु रजतत्वविशिष्टज्ञानमिति॥ अन्यस्यान्यथाभानसामग्र्यभावात्॥ प्रवृत्तिश्च स्व
तंत्रोपस्थितेष्टभेदाग्रहात्॥ नैय्यायिकमते प्रवर्तकं विशिष्टज्ञानं तेन भ्रमः सिध्यति॥ स्वप्नस्तु
अनुभूतपदार्थस्मरणैः अदृष्टेन धातुदोषेण जन्यते॥ अनध्यवसायश्च किंचिदिदमिति ज्ञानं
विशेषादर्शनाद्भवति॥ अत्र यद्ययं निर्वह्निः स्यात्तदा निर्धूमः स्यादिति तर्को विपर्ययमध्ये बोध्यः।
तत्र नैय्यायिकमते स्वप्नानध्यवसायौ विपर्ययमध्ये प्रविष्टौ॥ तेन तन्मते अयथार्थज्ञानं द्विविधं।
संशयो विपर्ययश्च॥ सुखं धर्मजन्यं॥ दुःखमधर्मजन्यं॥ इच्छा इष्टसाधनताज्ञानजन्या॥ द्वेषो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त०सं०
८

अनिष्टसाधनताज्ञानजन्यः॥ इति त्रिविधा॥ जीवनयोनियत्नरूपा प्रवृत्तिनिवृत्तिश्च॥ अन्या
जीवनादृष्टजन्या॥ द्वितीया इच्छाजन्या॥ तृतीया द्वेषजन्या॥ धर्मः श्रुतिविहितकर्मजन्यः॥ अधर्मः श्रु
तिविरुद्धाचरणजन्यः॥ वेगाख्यः संस्कारः आद्यक्रियाजन्यो द्वितीयादिक्रियाजनकः॥ यथा
वेगेन बाणश्चलति॥ भावनाख्यः संस्कारो विशिष्टज्ञानजन्यः॥ स्थितिस्थापकाख्यः
कारणगुणप्रक्रमजन्यः॥ गुरुत्वं कारणगुरुत्वजन्यं॥ नैमित्तिकद्रवत्वं जतुघृतसुवर्णादीना
मग्निसंयोगजन्यं॥ स्नेहः कारणगुणप्रक्रमजन्यः॥ शब्दस्त्रिविधः॥ संयोगजः विभागजः
शब्दजश्च॥ आद्यो भेरीदंडसंयोगजन्यः॥ द्वितीयो वंशादिदलद्वयविभागजन्यः॥ तृतीयस्तु
संयोगेन विभागेन वा आद्यशब्देजनितेन शब्देन निमित्तवायुसहकृतेन वीचीतरंगन्यायेन क
दंबगोलकन्यायेन वा जन्यते॥ उत्क्षेपणापक्षेपणाकुंचनप्रसारणगमनानि पंच कर्माणि॥ उत्क्षेप
णत्वादीनि जातयः॥ पृथिवीजलतेजवायुमनोवृत्तीनि कर्माणि॥ सर्वाण्यनित्यानि॥ अतींद्रियवृ
क्रि त्तीन्यतींद्रियाणि॥ प्रत्यक्षवृत्तीनि प्रत्यक्षाणि॥ अथ कर्मप्रक्रिया॥ संयोगेन नोदनाख्येन आद्यं
कर्म जन्यते॥ द्वितीयादि वेगजन्यं॥ क्रियातो विभागः विभागात् पूर्वसंयोगनाशः॥ उत्तरसं

क्रिया

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

योगः।ततः कर्मविभागयोर्नाशः।सामान्यं त्रिविधं।व्यापकं व्याप्यं॥ व्याप्य व्यापकं च।व्यापकं स
त्ता"व्याप्यं घटत्वादि॥ द्रव्यत्वादि व्याप्य व्यापकं च॥ व्यक्तेर भेदस्तुल्यत्वं संकरोथानवस्थितिः॥ रूपहा
निरसंबंधो जातिबाधकसंग्रहः॥ नित्यत्वे सत्यनेकसमवेतत्वं सामान्यलक्षणं॥ सामान्यानि नित्यानि
च॥ अतींद्रियरती न्यतींद्रियाणि॥ प्रत्यक्षरतीनि प्रत्यक्षाणि॥ नित्यद्रव्यवृत्तयोऽत्या विशेषाः॥ ते च ब
हवो नित्या अतींद्रियाश्च॥ प्रलये परमाणूनां भेदायते स्वीक्रियंते।ते चांवे धर्म्ये व्याप्यत्वादिति॥ स्वसं
बंधि भिन्नो नित्यः संबंधः समवायः॥ तेन स्वरूपसंबंधस्य संयोगस्य च निरासः॥ इह घटे घटत्वमि
ति प्रतीतिस्तत्र प्रमाणं॥ नैय्यायकमते समवायः प्रत्यक्षः नित्यश्च॥ नन्वन्यान्यपि अंधकारसुवर्णादीनि
द्रव्याणि संति॥ आलस्यादयो गुणा अपि संति कथं नवैवेत्यादि॥ मैवं॥ अंधकारो न द्रव्यं किंतु तेजो
भावः॥ सुवर्णं तेज एव॥ आलस्यं रत्नभावः॥ एवं अन्यदपि॥ अभावो द्विविधः॥ संसर्गाभावो न्योन्याभाव
श्च॥ आद्यस्त्रिविधः॥ प्रागभावो ध्वंसोऽत्यंताभावश्च॥ प्रागभावो विनाशी जन्यः॥ ध्वंसो जन्यो ऽवि
नाशी॥ अत्यंताऽन्योन्याभावावजन्यौ॥ अविनाशिनौ॥ योग्यानुपलब्ध्या अभावप्रत्यक्षं॥ अन्यत्र त्व
तींद्रियः॥ अथ प्रमा कथ्यते॥ स चतुर्विधा॥ प्रत्यक्षानुमित्युपमितिशाब्दरूपा॥ तत्करणानि प्रमाणानि चत्वारि।
प्रत्यक्षानुमानशाब्दभेदात्॥ तत्र प्रत्यक्षं द्विविधं॥ निर्विकल्पकं सविकल्पकं च॥ प्रत्यक्षकरणानिष
मानोप

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त०सं०

८

इंद्रियाणि॥ घ्राणरसनचक्षुस्त्वक्श्रोत्रमनांसि एतानि संनिकर्षसहितानि ■ प्रत्यक्षं जनयंति॥ संनिकर्षश्चालौकिको लौकिकश्च॥ अलौकिकस्त्रिविधः॥ ज्ञानलक्षणासामान्यलक्षणायोगजधर्मश्च॥ लौकिकषड्विधः॥ संयोगः। संयुक्तसमवायः। संयुक्तसमवेतसमवायः॥ समवायः। समवेतसमवायः। विशेषणतावेति॥ संयोगेन द्रव्यग्रहः। संयुक्तसमवायेन शब्दान्यगुणकर्मद्रव्यवृत्तिजातीनां प्रत्यक्षं॥ संयुक्तसमवेतसमवायेन शब्दमात्रवृत्तिजातीतरगुणवृत्तिकर्मवृत्तिजातीनां प्रत्यक्षं॥ समवायेन शब्दस्य। समवेतसमवायेन शब्दवृत्तिजातेः॥ विशेषणतया समवायस्याभावस्य च॥ अलौकिकः संनिकर्षो यथा॥ ज्ञानलक्षणया सुरभिचंदनमिति चाक्षुषं ज्ञानं॥ सामान्यलक्षणया घटत्वेन रूपेण यावत्घटज्ञानं॥ योगजधर्मेण योगिनो सर्वज्ञानं॥ तत्र निर्विकल्पकं विशेष्यप्रकारादिरहितं वस्तुस्वरूपमात्रज्ञानं॥ सविकल्पकं सप्रकारकं॥ भासमानवैशिष्ट्यप्रतियोगित्वं च प्रकारकत्वं॥ यथा अयं घटः। यत्र अयं विशेष्यः घटत्वं प्रकारः भासमानं वैशिष्ट्यं तयोः समवायः तस्य प्रतियोगि घटत्वं॥ सविकल्पकमेव विशिष्टवैशिष्ट्यज्ञानं॥ यथा दंडी तत्र दंडत्वविशिष्टस्य वैशिष्ट्यं पुरुषे भासते॥ अथ प्रक्रिया॥ आदौ इंद्रियसंनिकर्षात् घटघटत्वे इति निर्विकल्पकं॥ ततोऽयं घट इति विशिष्टज्ञानं॥ तत्र परतः परतः प्रामाण्यमिति नैयायिकाः॥ यथा आदौ अयं घट इति व्यवसायः॥

८

15

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ततः घटमहं जानामीत्यनुव्यवसायः॥ ततः प्रामाण्याप्रामाण्ये इति कोटिद्वयस्मरणं॥ अथ चतुर्थे इ
दं ज्ञानं प्रमा न वेति प्रामाण्यसंशयः॥ ततो विशेषदर्शनानंतरं प्रामाण्यग्रहः॥ इदं ज्ञानं प्रमा॥ समर्थप्रवृत्ति
जनकत्वात्॥ ज्ञानांतरवत्॥ स्वतःप्रामाण्यग्रह इति त्रयो मीमांसकाः॥ तत्र गुरुमते इदं ज्ञानं विषयं आत्मा
नं ज्ञान [redacted] प्रामाण्यं च गृह्णाति॥ मुरारिमिश्रमते ऽयं घट इति ज्ञानानंतरं घटमहं जानामीत्यनुव्यवसा
यस्तेनैव प्रामाण्यग्रहः॥ भट्टमते ज्ञानस्य अतींद्रियत्वेन ज्ञानमनुमेयं यथा तथा भवत्येव प्रामाण्यं॥ यथा ऽ
यं घट इति ज्ञानानंतरं घटे ज्ञातता उत्पद्यते॥ ततो ज्ञातो मया घट इति ज्ञाततापत्यक्षं॥ ततो व्याप्त्यादिप्रस
क्तानंतरं ज्ञानानुमानं॥ यथा अयं घटत्वप्रकारकज्ञानवान्। घटत्वप्रकारकज्ञाततावत्त्वात्॥ तस्य धर्मधर्मिवि
षयकत्वेन प्रामाण्यानुमानं॥ अनुमितिकरणं अनुमानं॥ अनुमितित्वं जातिः॥ व्यापारवत्कारणं करणं॥ व्या
पारश्च तज्जन्यत्वे सति तज्जन्यजनकः॥ हेतुतानादिकरणं॥ परामर्शो व्यापारः॥ परामर्शश्च व्याप्तिविशिष्टज्ञानं॥
यथा वह्निव्याप्यधूमवानयमिति॥ आदौ महानसादौ धूमवह्निसामानाधिकरण्यग्रहे सति धू= पक्षधर्मता=
मो वह्निव्याप्य इत्यनुभवो जन्यते॥ ततः कालांतरे पर्वते धूमे दृष्टे सति व्याप्तिस्मरणं॥ तदश्च विशिष्टवैशिष्ट्यज्ञा त
नं। वह्निव्याप्यधूमवानयमिति तृतीयलिंगपरामर्शः॥ पक्षता सहितेन तेन पर्वतो वह्निमानित्यनुमितिर्जन्यते॥
व्याप्तिश्च हेतुसमानाधिकरणात्यंताभावाप्रतियोगिसाध्यसामानाधिकरण्यं॥ न चायं संयोगवान्

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्रव्यत्वादिसत्ताव्याप्तिः॥ प्रतियोगिव्यधिकरणहेतुसमानाधिकरणात्यंताभावाप्रतियोगिसाध्यसा
त०सं० मानाधिकरण्यमित्यर्थात्॥ पक्षतावत्त्वसिषाधयिषाविरहसहकृतसिद्ध्यभावः॥ अनुमानं द्विविधं॥
९ स्वार्थं परार्थंच॥ तत्र परार्थं पंचावयववाक्यसाध्यं॥ अवयवाश्च प्रतिज्ञाहेतूदाहरणोपनयनिगमनानि॥ पर्वतो
वह्निमान् धूमात्॥ यत्र धूमस्तत्र वह्निः॥ यथा महानसः॥ वह्निव्याप्यधूमवानयं॥ तस्मात् वह्निमान्॥ स्वा
र्थं तु स्वीयव्याप्त्यादिज्ञानसाध्यं॥ न तत्र परप्रतिपत्त्यर्थमिवा॥ हसंप्रयोगः॥ तच्चानुमानं त्रिविधं॥ केवला
न्वयिकेवलव्यतिरेकिअन्वयव्यतिरेकिभेदात्॥ यत्र साध्यव्य=शब्द=तिरेको न कुत्राप्यस्ति स केवलान्वयि।
यथा घटोभिधेयः प्रमेयत्वात्॥ इत्यत्र अभिधेयत्वसाध्यस्य व्यतिरेकाप्रसिद्धेः॥ यत्र साध्यप्रसिद्धिः पक्षाति
रेकेनास्ति स केवलव्यतिरेकी॥ यथा पृथिवीतरेभ्यो भिद्यते पृथिवीत्वात्॥ यत्र इतरभेदाभावस्तत्र पृथिवीत्वा
भावः॥ यथा जलादि॥ व्यतिरेकव्याप्तौ तु साध्याभावो व्याप्यः हेत्वभावो व्यापकः॥ सोन्वयव्यतिरेकी॥ यत्र
साध्यं साध्याभावश्च अन्यत्र प्रसिद्धः॥ यथा पर्वतो वह्निमान् धूमादिति॥ अन्वयव्यतिरेकिणि हेतौ अवश्यं
प पंचरूपोपन्नता अपेक्षणीया॥ पक्षसत्त्वं सपक्षसत्त्वं विपक्षव्यावृत्तत्वं अबाधितत्वं असत्प्रतिपक्षत्वं चेति पंच
रूपाणि॥ केवलान्वयि विपक्षव्यावृत्तत्वरहितत्वं॥ केवलव्यतिरेकिणि सपक्षसत्त्वरहितं चतूरूपमेवापेक्षितं॥
यत्र साध्यसंदेहः। स पक्षः॥ यत्र साध्यनिश्चयः स सपक्षः॥ यत्र साध्याभावनिश्चयः स विपक्षः॥ साध्याभावव

९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न् पक्षो बाधः साध्यविरोधिसाधको हेतुः सत्प्रतिपक्षः॥ सोपाधौ पक्षसत्ताद्यान्यतम भंग आवश्यकः॥ सो
पाधिश्च स्वव्यभिचारिता संबंधेन उपाधिविशिष्टः॥ उपाधिश्च त्रिविधः॥ साधनाव्यापकत्वे सति शुद्ध साध्य
व्यापकः॥ साधनाव्यापकत्वे सति पक्षधर्मावच्छिन्न साध्यव्यापकः॥ साधनाव्यापकत्वे सति साधनावच्छि
न्न साध्यव्यापकश्च॥ आद्यो यथा। अयोगोलकं धूमवान् वह्नेः॥ अत्र आर्द्रेधनप्रभववह्निमत्त्वमुपाधिः॥ साधना
व्यापकत्वे सति शुद्ध साध्यव्यापकः॥ द्वितीयो यथा॥ वायुः प्रत्यक्षः प्रत्यक्षस्पर्शाश्रयत्वात्॥ अत्र बहिर्द्र
व्यत्वावच्छिन्न प्रत्यक्षत्वस्य साध्यस्य व्यापकम् उद्भूतरूपवत्त्वमुपाधिः॥ तृतीयो यथा॥ ध्वंसो विनाशी जन्य
त्वात्॥ अत्र जन्यत्वावच्छिन्न विनाशित्व व्यापकं भाववत्त्वमुपाधिः॥ अथ हेत्वाभासाः कथ्यंते॥ सव्यभिचा
र विरुद्ध सत्प्रतिपक्षासिद्धबाधिताः पंच हेत्वाभासाः॥ सव्यभिचारस्त्रिविधः॥ साधारणोऽसाधारणा
नुपसंहारिभेदात्॥ साध्याभाववद्वृत्तित्वं साधारणत्वं॥ यथा धूमवान् वह्नेः॥ सकलसपक्षव्यावृत्तत्वं
मसाधारणत्वं॥ यथा। पर्वतो वह्निमान् पर्वतत्वात्॥ सर्वपक्षत्वम् अनुपसंहारित्वं॥ यथा सर्वं प्रमेयं अभि
धेयत्वात्॥ साध्याभावव्याप्यो हेतुर्विरुद्धः॥ यथा घटो नित्यः सावयवत्वात्॥ सत्प्रतिपक्षो यथा॥ पर्व
तो वह्निमान् धूमात्। पर्वतो वह्न्यभाववान् महानसत्वात्॥ असिद्धस्त्रिविधः॥ आश्रयासिद्धः स्वरूपा
सिद्धो व्याप्यत्वासिद्धश्च॥ यत्र पक्षो सन् सिद्धसाधनं वा स आश्रयासिद्धः॥ यथा शशविषाणं नि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त०स० त्यं अजन्यत्वात्॥ शरीरं हस्तादिमत् तथा प्रतीयमानत्वात्। यत्र पक्षावृत्तिर्हेतुः स स्वरूपासिद्धः॥ य हस्तादिमत्१
थापर्वतो वह्निमान् महानसत्वात्॥ सत्त्वविशेषणासिद्धविशेष्यासिद्धभागासिद्धभेदाद्बहुविधः॥ तत्रा
१० द्यो यथा॥ शब्दो नित्यश्चाक्षुषत्वे सति जन्यत्वात्॥ द्वितीयो यथा॥ शब्दो नित्यः गुणत्वे सति परमाणु
वृत्तित्वात्॥ तृतीयो यथा॥ एतानि द्रव्याणि निरवयवत्वात्॥ बाधो यथा। जलह्रदो वह्निमान् द्रव्यत्वात्।
तेन एतद्दोषरहितो हेतुः सद्धेतुः॥ उपमितिकरणमुपमानं॥ कीदृशो गवयः इति प्रश्ने गोसदृशो गवयः इ
त्युत्तरे तेन श्रुत्वा गोसदृशं प्राणिनं पश्यति तदा पूर्वोक्तवाक्यार्थस्मरणानन्तरं अयं गवयपदवाच्य इति यः
शक्तिग्रहः सा उपमितिः॥ आप्तोक्तः शब्दः प्रमाणं॥ प्रकृतवाक्यार्थज्ञो वक्ता यथार्थज्ञानवानाप्तः॥ पद
ज्ञानं करणं॥ पदार्थोपस्थितिर्व्यापारः॥ आकांक्षायोग्यतासन्निधानानि सहकारीणि॥ फ
लं शाब्दबोधः॥ स्वरूपयोग्यत्वे सति अजनितान्वयबोधजनकत्वमाकांक्षा॥ तेन घटः कर्मत्वमान
यनं कृतिरित्यत्र नान्वयबोधः॥ स्वरूपायोग्यत्वात्॥ अयमेति पुत्रो राज्ञः पुरुषोऽपसार्यतामित्यत्र
राज्ञः पुरुष इति नान्वयबोधः॥ पुत्रेण जनितान्वयबोधत्वात्॥ बाधकप्रमाविरहो योग्यता॥ ते
न वह्निना सिंचतीत्यत्र नान्वयबोधः॥ अयोग्यत्वात्॥ अव्यवधानेनान्वयप्रतियोग्युपस्थितिस्सा

२०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सक्तिः॥ तेन गिरिर्भुक्तो वह्निमानित्यत्र नान्वयबोधः॥ तत्तदर्थप्रतीतीच्छोच्चरितत्वं तात्पर्यं॥ तेन भोजनप्रकर
णे सैंधवमानयेत्युक्तेऽश्वान्वयबोधो न भवति॥ वृत्त्या विना शब्देन नान्वयबोधो जन्यते॥ वृत्तिर्द्विविधा॥ श
क्तिर्लक्षणा च॥ शक्तिर्घटादिपदस्य घटादौ॥ लक्षणा यथा गंगायां घोषः [redacted] प्रतिवसतीत्यत्र गंगापदार्थः प्र
वाहे घोषवासान्वयानुपपत्त्या गंगाशब्दस्य तीरे लक्षणा कल्प्यते॥ तया वृत्त्योपस्थिते तीरे घोषः प्रतिवसती
त्यन्वयबोधो भवति॥ गौणी वृत्तिरपि लक्षणैव॥ यथाग्निर्माणवको गौर्वाहीकः अत्र लक्षणया अग्न्यादि
सादृश्यं प्रतीयते॥ शक्तं पदं चतुर्विधं॥ यौगिकं॥ रूढं॥ योगरूढं॥ यौगिकरूढं॥ आद्यं यथा॥ पाचका
दिपदं योगार्थेन पाककर्तरि शक्तं॥ द्वितीयं यथा॥ विप्रादिपदं ब्राह्मणवाचकं॥ तृतीयं यथा॥ पंकजादिप
दं योगरूढ्या पंकजनिकर्तृत्वेन पद्म[redacted]वाचकं॥ चतुर्थं यथा॥ उद्भित्पदं यौगिकरूढ्या अंकु
रवाचकं॥ लक्षणा द्विविधा॥ जहत्स्वार्था अजहत्स्वार्था च॥ आद्या यथा॥ गंगायां घोष इत्यादौ॥ द्वितीया
यथा॥ सर्वे छत्रिणो यांति इत्यादौ॥ अत्र छत्रिणः सदितरस्यापि गमनान्वयः॥ अथ शाब्दबोधप्रक्रिया॥
देवदत्तो ग्रामं गच्छतीत्यत्र ग्रामकर्मकगमनजनकवर्तमानकृतिमानित्यन्वयबोधः॥ द्वितीयार्थः कर्मत्वं॥ धा
तोर्गमनं॥ जनकत्वं संसर्गमर्यादया लभ्यं॥ लटो वर्तमानत्वं॥ आख्यातस्य कृतिः॥ सत्वं बंधसंसर्ग

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न०म०
११

मर्यादालभ्यः यत्र कर्तरि सूते बोधस्तत्र आख्यातस्य व्यापारादौ लक्षणा॥ यथा रथो गच्छतीत्यत्र गमन
जनकवर्तमानव्यापारवानर्थः॥ दधि पश्येत्यादौ द्वितीयापतोपस्थिते दधिशब्द एव अजहत्स्वार्थल
क्षणया दधिकर्मत्वं चोपस्थापयति॥ एकवचनाद्युपस्थितिमेकत्वादि सर्वत्रैव प्रथमान्तपदोपस्थापि
तेऽन्वेति॥ देवदत्तेन गम्यते ग्राम इत्यस्य देवदत्तवृत्तिकृतिजन्यगमनजन्यफलशाली ग्राम इत्यर्थः॥ व
या५ त्तित्वं संसर्ग[redacted] बललभ्यं॥ तृतीयार्थश्च कृतिजन्यत्वं संसर्गः। गमनं धात्वर्थः॥ जन्यत्वं संसर्गः॥ फलं कर्मास
नेपदार्थः शालित्वं संसर्गः॥ भावप्रत्यये तु देवदत्तेन सुप्यत इत्यस्य देवदत्तवृत्तिकृतिजन्यः स्वाप इत्यर्थः॥
भावप्रत्यये फलाभावात् आत्मनेपदार्थो न भासते॥ भविष्यत्त्वं लृटोऽर्थः॥ तच्च विद्यमानप्रा
गभावप्रतियोग्युत्पत्तिकत्वं॥ तेनागमिष्यतीत्यत्र विद्यमानप्रागभावप्रतियोग्युत्पत्तिकाय स४
मानुकूलकृतिमानित्यर्थः॥ लुटोऽर्थः अनद्यतनमपि। लुङोऽर्थः उत्पत्तिभूतत्वं च। भूतत्वमतीत
त्वं तच्चोत्पत्तावन्वेति॥ तथा च विद्यमानध्वंसप्रतियोग्युत्पत्तिकत्वं लब्धं॥ लिटोऽपि परोक्षत्वमती
तत्वं चार्थः॥ तदन्वयः पूर्ववदुत्पत्तौ॥ लङोऽनद्यतनत्वं चार्थः॥ कृतिसाध्यत्वे सति बलवदनिष्टा

म ११

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

जनकेष्टसाधनत्वं॥ स्वर्गकामो यजेतेत्यादौ कृतिसाध्यबलवदनिष्टाजनकेष्टसाधनयाग
कः स्वर्गकाम इत्यर्थः॥ आशीर्लिङो लोटोर्थः॥ वक्त्रिच्छाविषयत्वं॥ तेन घटमानयेत्यत्र घटकर्म
कमदिच्छाविषयानयनानुकूलकृतिमांस्त्वमित्यन्वयः॥ व्याप्यक्रियाव्यापकक्रियाया आपादनं
लृङोर्थः॥ तात्पर्यवशात्क्वचिद्भूतत्वं क्वचिद्भविष्यत्वं लृङा बोध्यते॥ सनः कर्तुरिच्छार्थः॥ सनु य
तराख्यानस्याश्रयत्वे लक्षणा॥ सविषयकार्थप्रकृतिकाख्यातस्य लक्षणाया आश्रयत्वे॥
घटं जानामीत्यादौ प्रत्यात्। यङोर्थः। पौनःपुन्यं नत्वं च नदानींतनत्वं॥ प्रकृत्यर्थसजातीयपु
क्रियांतरध्वंसकालीनत्वे सति वर्तमानादिकृतिविषयत्वं॥ पापच्यते इत्यादौ नादृशकाली
नत्वमेव यङा प्रत्याय्यते॥ आख्यातस्य चरमदलवाचकत्वान्न विशिष्टवाचकत्वं॥ यङः
नदानींतनत्वं च स्थूलकालमादाय पूर्वकालीनत्वेन प्रागभावकालवर्तित्वं॥ तदुत्पत्तिका
लीनध्वंसप्रतियोगिकालवृत्तित्वं वा॥ तेन भुक्त्वा व्रजतीत्यत्र गमनप्रागभावावच्छिन्नका
लवृत्तिभोजनकर्तृभिन्नो व्रजतीत्यर्थः॥ समानविभक्तिकपदेन अभेदेन धर्मिवाचकत्वात्॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न० म० ९२

अन्वयेनत्का परविभक्तिलोपाभूत्॥ कालत्वात्पर्यवशात् व्यवहिताव्यवहितसाधार

णोबोद्धव्यः॥ तेन पूर्वस्मिन्नब्दे गत्वास्मिन्नब्दे समागत इत्यत्र नादृशप्रयोगावगमः॥

इच्छावान् तुमुनोर्थः॥ भोक्तुं व्रजतीत्यस्य भोजनेच्छावान् व्रजतीत्यर्थः॥ भोक्तुमिच्छती

त्यत्र कर्तरि लक्षणा॥ भोजनकर्तारमात्मानमिच्छतीत्यर्थः॥ सविशेषणे हीति न्यायात्॥

विशेषणे तुमादिष्वान्वयः॥ प्रकृतधात्वर्थकर्ता शानज्शानचोः॥ धात्वर्थजन्यफलवान्क

र्म शानचोर्थः॥ शत्रादीनां कर्ता वाच्यः॥ सविषयार्थप्रकृतिकानां त्वाश्रये लक्षणा॥

एवं कर्तृकर्मकृतां तेन रूपेण कर्ता कर्म च वाच्यं॥ भावकृतां तु ल्युट्घञादीनां प्रयोगसा

धुत्वमात्रं॥ धात्वर्थातिरिक्तस्य भावकृता नुपस्थाना[illegible]दिति॥ ननु नीलं घटमानयेत्या

दौ द्वितीयाद्युपश्रवणात्कर्मद्वयबोधापत्तिः॥ ननु विशिष्टकर्मत्वमिति चेन्न॥ न

न्न विशेषणविभक्तिः साधुत्वाय। अथवा विशेषणविभक्तेरभेदार्थः॥ अत्रायं विशे

षः॥ द्वितीयपक्षे व्यासस्समासयोः पर्यायतानघटते॥ व्यासेन नीलं घटमित्या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त०म०
१३

दौ अभेदस्य पदार्थत्वेन प्रकारत्वान्न संसर्गत्वं॥ नीलघट इत्यादौ कर्मधारये लक्षणा या
अस्वीकारेण भेदस्यापदार्थत्वेन संसर्गत्वात्। तथा चव्यासमाससमासयोः पर्यायत्वानुरोधे
न षष्ठीसमासे राजपुरुष इत्यादौ षष्ठ्यर्थसंबंधलक्षणा न घटते॥ संबंधस्य संसर्गमर्या
दालभ्यत्वात्॥ वस्तुतस्तु विरुद्धविभक्त्या न वरुद्धस्याभेदबोधकत्वव्युत्पन्नेर्मुख्यार्थराजभेद
स्य बाधेन राजपदस्य राजसंबंधिनि लक्षणा॥ एवं बहुव्रीहौ। चरमपदस्य अन्यपदार्थे लक्ष
णा॥ एवं नञोर्थे भावः॥ अघटभूतलमित्यादौ घटभिन्ने लक्षणा॥ ... लिंजं भक्षयेदिति।
यथा नीलं सरोजं भवत्येव॥ विशेषणसंगतस्यायोगव्यवच्छेदः। यथा शंखः पांडरः एवं
निविशेष्यसंगतस्यान्ययोगव्यवच्छेदार्थः। पार्थ एव धनुर्धर इत्यादौ। एवं दिशा सर्वं बो
ध्यमिति॥ ॥इति श्रीजगदीशभट्टाचार्यविरचितं तर्कामृताख्यं प्रकरणं समाप्तं॥ ॥
श्री कृष्ण कृष्ण कृष्ण कृष्ण कृष्ण कृष्ण कृष्ण॥ ॥श्रीसदाशिवप्रसंन्न॥ श्रीरस्तु॥ श्रीः॥
शके १६९९ हेमलंबी संवत्र कुंटे इत्युपनाम क रघुनाथस्येदं पुस्तकं स्वार्थं परार्थं च॥ ॥

१३

KKSU LIBRARY
RAMTEK
441 106
M1459
Dist Nagpur

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=19.10.20 14:47
,TRANSFERRED=2020/10/19 at 14:51:07
,PAGES=24
,TYPE=STD
,NAME=S0004173
,Book Name=M-1459-TAKMRITI
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection